# ॥ पंचशान्ति ॥

# PANCHA SHANTI / SHANTHI PANCHAKAM

## MANTRA 1

ओं शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न
इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे ।
नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं
ब्रह्म वदिष्यामि । ऋतं वदिष्यामि। सत्यं वदिष्यामि ।
तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ॥
॥ ओं शान्तिः शान्तिः शान्तिः ॥१॥

## MANTRA 2

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः ।

शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो ।

त्वमेव प्रत्यक्षं ब्रह्मासि । त्वा-मेव प्रत्यक्षं ब्रह्म वादिषम् ।

ऋतम वादिषम् । सत्यम वादिषम् । तन्मामावीत् ।

तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

# MANTRA 3

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

## MANTRA 4

नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो

वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो

मन्त्रपतिभ्यो मा मामृषयो मन्त्रकृतो मन्त्रपतयः परा

दुर्माऽहमृषीन् मन्त्रकृतो मन्त्रपतीन् परादां

वैश्वदेवीं वाचमुद्यासꣳ शिवामदस्तां जुष्टां देवेभ्यः

शर्म मे द्यौः शर्म पृथिवी शर्म विश्वमिदं जगत्।

शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्म-प्रजापती ।

भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो

वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिद

मुपस्तरण मुपस्तृण उपस्तरणं मे प्रजायै पशूनां

भूया दुपस्तरण महं प्रजायै पशूनां भूयासं

प्राणापानौ मृत्योर्मापातं प्राणापानौ मा मा हासिष्टं

मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि
मधुमतीं देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यां
मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

# MANTRA 5

तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये ।दैवी-स्स्वस्ति

रस्तु नः । स्वस्ति-र्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो

अस्तु द्विपदे । शं चतुष्पदे ॥

ॐ शान्तिः शान्तिः शान्तिः ॥